सत्त्वेव अण् सातः विष्णुरूपाङ्गत्वेनास्त्यस्य मतुपि अलोपश्छान्दसः इत्युक्तम्।

**सात्वत** त्रि॰ सत्त्वमेव सात्त्वं तत्तनोति तन—ड। १विष्णौ त्रिका॰ यदुवंश्ये अंशुपुत्रे २नृपभेदे "अथांशोः सात्वतो नाम विष्णुभक्तः प्रतापवान्" कूर्मपु॰ २२ अ॰। तद्वंश्ये ३बलरामे हेमच॰। "सत्त्वं सत्त्वाश्रयं सत्त्वगुणं सेवेत केशवम्। योऽनन्यत्वेन मनसा सात्त्वतः स उदाहृतः" इत्युक्ते ४विष्णुभक्तभेदे। ५सात्त्वतनृपाधिष्ठितदेशे सोऽभिजनोऽस्य अण्। पित्रादिक्रमेण ६तद्देशवासिनि च त्रिका॰। यदुवंशप्रोत्पन्नत्वेन ७शिशुपालमातरि स्त्री ङीप्। "न दूये सात्वतीसूनुः" माघः। सा च नाटकस्य ८वृत्तिभेदे च। तस्या लक्षणादि सा॰द॰उक्तं यथा "सात्त्वती बहुला सत्त्वशौर्य्यत्यागदयार्जवैः। सहर्षा क्षुद्रशृङ्गारा विशोका साद्भुता तथा। उत्थापकोऽथ सांघात्यः संलाप परिवर्त्तकः। विशेष इति चत्वारः सात्त्वत्याः परिकीर्त्तिताः। उत्तेजनकरी शत्रोर्वागुत्थापक उच्यते। मन्त्रार्थदैवशक्त्यादेः सांघात्यः सङ्घभेदनम्। संलापः स्यात् गभीरोक्तिर्नानाभावसमाश्रयः। प्रारब्धादन्यकार्य्याणां करणं परिवर्त्तकः"। तल्लोपे एकस्वरोऽपि। ९जातिभेदे पुंस्त्री॰ सुधन्वाचार्य्यशब्दे दृश्यम्।

**सात्त्विक** पु॰ सत्त्वात् सत्त्वगुणप्रधानात् विष्णोर्भवति ठञ्। १चतुर्मुखे ब्रह्मणि हेमच॰। तस्य विष्णुनाभिकमलजत्वात् तथात्वम्। सत्त्वमेव सात्त्वमस्त्यस्य ठन्। २विष्णौ। सत्त्वगुणेन तत्कार्य्येण मनसा वा निर्वृत्तः ठञ्। ३सत्त्वगुणजाते ४सत्त्वप्रधानमनोविशेषजाते च। ५शृङ्गारादिरसानुगुणे भावभेदे सा॰द॰

"अङ्गाः स्त्रीणामलङ्कारा अङ्गजाश्च स्वभावजाः। तद्रूपाः सात्त्विका भावास्तथा चेष्टाः परा अपि। विकाराः सत्त्वसम्भूताः सात्त्विकाः परिकीर्त्तिताः। सत्त्वमात्रोद्भवत्वात्ते भिन्ना अप्यनुभावतः। स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः। वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः"। एतेषां लक्षणानि तत्तच्छब्दे दृश्यानि। स्त्रीणां यौवने सत्त्वजाते ६अलङ्कारभेदे सा॰द॰ "यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः"। अलङ्कारशब्दे ४०८ पृ॰ दृश्यम्। ७सत्त्वप्रधाने त्रि॰। ८देवीपूजाभेदे स्त्री "शारदी चण्डिकापूजा त्रिविधा परिकीर्त्तिता। सात्त्विकी राजसी चैव तामसी चेति तां शृणु। सात्त्विकी जपयज्ञैश्च नैवेद्यैश्च निरामिषैः" ति॰त॰। ९भावभेदे पुं॰ "सत्त्वोत्कटे मनसि ये प्रभवन्ति भावास्ते सात्त्विका इति विदुस्तन्निपुणबुद्धयस्तु" सर्वान॰। १०सत्त्वप्रधाने पुराणभेदे "वैष्णवं नारदीयञ्च तथा भागवतं शुभम्। गारुडञ्च तथा पाद्मं वाराहं शुभदर्शने!। सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै। सात्त्विकेषु पुराणेषु विष्णुमाहात्म्यवर्णनम्" उपपुराणशब्दे दृश्यम्। ११स्मृतिभेदे स्त्री "वासिष्ठं चैव हारीतं व्यासं पाराशरं तथा। भारद्वाजं काश्यपञ्च सात्त्विक्यो मुक्तिदाः शुभाः" पद्मपु॰ उत्त॰ ४३अ॰। १२दुर्गायां स्त्री ङीप्। १३गीतोक्तेषु श्रद्धादिभेदेषु यथायथं त्रि॰ यथा

"सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत!। श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः। यजन्ते सात्त्विका देवान्" (श्रद्धा) "आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः। यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु" इत्युपक्रमे "आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्द्धनाः। रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः" (आहारः) "अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते। यष्टव्यमेवेति मनः समाधाय स सात्त्विकः" (यज्ञः) "श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः। अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते" (कायिकादि त्रिविधं तपः) "दातव्यमिति यद्दानं दीयतेऽनुपकारिणे। देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्" (दानम्) "सर्वभूतेषु येनैकं भावमव्ययमीक्षते। अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्" (ज्ञानम्) "नियतं सङ्गरहितमरागद्वेषतः कृतम्। अफलप्रेप्सुना कर्म यत्तत् सात्त्विकमुच्यते" (कर्म) "मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः। सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्त्विक उच्यते" (कर्त्ता) "प्रवृत्तिं च निवृत्तिं च कार्य्याकार्य्ये भयाभये। बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ! सात्त्विकी" (बुद्धिः) "धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः। योगेनाव्यभिचारिण्या धृतिः सा पार्थ! सात्त्विकी" (धृतिः) "यत्तदग्रे विषमिव परिणामेऽमृतोपमम्। तत् सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम्" (सुखम्) "कार्य्यमित्येव यत् कर्म नियतं क्रियतेऽर्जुन!। सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः" (त्यागः)। तत्र सात्त्विकाहारस्य चित्तशुद्धौ हेतुत्वं छान्दो॰ उक्तं यथा "आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः"। सत्त्वं मनः। "अन्नमयं हि सौम्य! मनः इत्यादिना" तत्र